Semester- IV, CC-8, Sec-C, Mehrauli Iron Pillar Inscription of Chandra.

## राज्ञः चन्द्रस्य मेहरौलि-लौहस्तम्भलिपिः

### मूलपाठः

यस्योद्वर्तयतः प्रतीपमुरसा शत्रून् समेत्यागतान्

वङ्गेष्वाहववर्त्तिनोऽभिलिखिता खड्गेन कीर्त्तिर्भुजे।

तीर्त्वा सप्त मुखानि येन समरे सिन्धोर्जिता वाह्लिका

यस्याद्याप्यधिवास्यते जलनिधिर्वीर्यानिलैर्दक्षिणः॥ १

खिन्नस्येव विसृज्य गां नरपतेर्गामाश्रितस्येतरां

मूर्त्या कर्मजितावनिं गतवतः कीर्त्या स्थितस्य क्षितौ।

शान्तस्येव महावने हुतभुजो यस्य प्रतापो महा-

न्नाद्याप्युत्सृजति प्रणाशितरिपोर्यत्नस्य शेषः क्षितिम्॥ २

प्राप्तेन स्वभुजार्जितञ्च सुचिरञ्चैकाधिराज्यं क्षितौ

चन्द्राह्वेन समग्रचन्द्रसदृशीं वक्त्रश्रियं विभ्रता।

तेनायं प्रणिधाय भूमिपतिना भावेन विष्णौ मतिं

प्रांशुर्विष्णुपदे गिरौ भगवतो विष्णोर्ध्वजः स्थापितः॥ ३

## पर्यालोचनम्

नूतनदिल्लीनगर्याः दक्षिणस्यां दिशि मेहरौलीति प्रदेशे कुतुवमिनारस्य समीपे कुव्वत-उल्-इसलाम इति मसजिदस्य समीपे शुण्डाकारविशिष्टे लोहस्तम्भे अयम् अभिलेखः उत्कीर्णः प्राप्यते। मेहरौलि इत्यस्य प्राचीनं नाम हि मिहिरपुरी इति। अयं स्तम्भः प्रथमतः विष्णुपदगिरौ प्रतिष्ठितः आसीत्। ततश्च कश्चित् उद्यमी राजा इमम् स्तम्भम् दिल्लीम् आनीय स्थापितवान्। ख्रिष्टीयपञ्चमशताब्द्याः उत्तरभारतस्य उत्तरकालीनब्राह्मीलिप्या अयम् अभिलेखः विरचितः अभवत्। संस्कृतभाषया विरचितोऽयम् अभिलेखः। अत्र शार्दूलविक्रीडितच्छन्दसा त्रयः श्लोकाः सन्ति। यद्यपि अयम् अभिलेखः अवयवविचारेण अतीव लघुः तथापि उत्तमकाव्यरूपेण अस्य परिगणनं निश्चप्रचं भवितुम् अर्हति। कश्चित् अप्रसिद्धः कविः वैदर्भरीत्या चन्द्रस्य माहात्म्यं वर्णयितुम् चमत्कारतया विविधानाम् अलंकाराणाम् सन्निवेशं कृतवान्। द्वितीये श्लोके उत्प्रेक्षा-उपमा-अतिशयोक्त्यलंकाराणां रमणीयः सन्निवेशः विदुषां चित्तेषु चमत्कारित्वं जनयति। अत्र वीररसस्य प्रयोगोऽपि सार्थकपदवीं भजते।

अस्मिन् अभिलेखे राज्ञः चन्द्रस्य प्रशस्तिः प्राप्यते, इयं च प्रशस्तिः तस्य मृत्योः उत्तरकालीना इति केचन विद्वांसः मन्यन्ते। प्राध्यापकस्य दीनेशचन्द्र-सरकारमहोदयस्य मतानुसारम् अयम् अभिलेखः चन्द्रस्य मरणात् परमेव विरचितः अभवत्। तस्य मते अयं राजा चन्द्रः आसीत् गुप्तसम्राट् द्वितीयः चन्द्रगुप्तः, यः परिणतवयसि इमं स्तम्भं विनिर्मितवान्। तस्य मरणात् परम् तस्य पुत्रः प्रथमः कुमारगुप्तः अस्याः प्रशस्तेः उत्कीर्णकार्यं सम्पादितवान्।

अत्र चन्द्रस्य माहात्म्यं वर्णितम्। रणक्षेत्रे अस्त्राघातेन सृष्टानि क्षतचिह्नानि तस्य यशः एव उद्घोषयन्ति। शत्रूणां समवेतरूपेण आक्रमणमपि स हेलया दूरीकरोति स्म। सिन्धुनदस्य सप्तमुखानि अतिक्रम्य स वाह्लीकजयं कृतवान्। दक्षिणसमुद्रोऽपि तस्य कीर्तिसौरभेण परिव्याप्तः आसीत्। तस्मिन् विगतेऽपि अद्यापि तस्य प्रतापः पृथिव्याम् उत्तापं विस्तारयति। भगवन्तं विष्णुं प्रति तस्य भक्तिः अपि अस्मिन् अभिलेखे प्रकाशिता अभवत्। अत्र प्राप्यते यत् अयं चन्द्रराजः विष्णुपदपर्वते भगवतः विष्णोः ध्वजं प्रतिष्ठितवान्। स्तम्भोऽयं गुप्तयुगस्य धातुविद्यायाः चरमः साक्षी। ज्योतिर्विज्ञानस्य समुन्नतेः प्रमाणम् अपि अयं स्तम्भः। गवेषकाणां मतानुसारम् स्तम्भः अयं यत्र विष्णुपदगिरौ प्रतिष्ठितः आसीत् स हि वर्तमानकालस्य उदयगिरिः इति। अयम् उदयगिरिः कर्कटक्रान्तिरेखायाः उपरि विराजते। आधुनिककालस्य गवेषणया प्रमाणितं यत् ज्योतिर्विद्यायाः विचारेण अयं स्तम्भः अतीव माहात्म्ययुक्ते स्थाने प्रतिष्ठितः अभवत्। सूर्यस्य उत्तरायणकाले प्रातः अस्य स्तम्भस्य छाया त्रयोदशसंख्यकायां गुहायाम् अनन्तशयनरतस्य विष्णोः पदमूलं स्पृशति स्म। एवं सर्वतोभावेन अस्य अभिलेखस् गुरुत्वम् आसीत् इति निश्चप्रचं वक्तुं शक्यते इति शम्।